इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्जधातुवत् (169) बोध्यानि। [A]तर्जितः-तवान्।

(710) "तर्ज तर्जने" (X-चुरादिः-1682. सक. सेट्. आत्म.)

आकुस्मीयः।

'सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥' (श्लो. 66) इति देवः।

तर्जकः-र्जिका, तितर्जयिषकः-षिका, तर्जयिता-त्री, तितर्जयिषिता-त्री; तर्जयमानः, तर्जयिष्यमाणः, तितर्जयिषमाणः, तितर्जयिषिष्यमाणः; इत्यादीनि सर्वाण्यपि रूपाणि गन्धधातुवत् (375) ज्ञेयानि। क्विपि-तर्क्-तर्ग्-तर्जौ-तर्जः, इति रूपाणीति विशेषः।

(711) "तर्द हिंसायाम्" (I-भ्वादिः-58. अक. सेट्. पर.)

[B]तर्दकः-र्दिका, तर्दकः-र्दिका, तितर्दिषकः-षिका, तातर्दकः-र्दिका; तर्दिता-त्री, तर्दयिता-त्री, तितर्दिषिता-त्री, तातर्दिता-त्री; इत्यादीनि सर्वाणि रूपाणि कर्जधातुवत् (169) ऊह्यानि।

(712) "तल प्रतिष्ठायाम्" (X-चुरादिः-1598.सक. सेट्. उभ.)

तालकः-लिका, तितालयिषकः-षिका; तालयिता-त्री, तितालयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि कलधातुवत् (175) बोध्यानि। पचाद्यचि-[C]तलः। 'तलम्-अच्। संज्ञापूर्वको विधिरनित्यः' (परिभाषा 95) इति वृद्ध्यभावः। मैत्रेयस्तु - 'घुषिरविशब्दने' (7-2-23) इति ज्ञापकं सामान्यमित्युक्त्वा, णिजभावे तलशब्दमाह ॥' इति मा. धा. वृत्तिः॥

(713) "तसि अलङ्करणे" (X-चुरादिः-1730. सक. सेट्. उभ.)

'तसि भूष अलङ्कारे' इति दुर्गसम्मतः पाठ इति स्वामी। प्रायेणायम् अवपूर्वः। 'तस्यत्युपक्षयार्थे णौ, अलङ्कारे तु तंसयेत् ॥' (श्लो. 189) इति देवः।

अवतंसकः, [1]वतंसकः तंसकः-सिका, तितंसयिषकः-षिका, तंसकः-सिका,

---

1. 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।' इति वचनेन अवतंसकः-वतंसकः, इत्युभयमपि साधु।

A. 'स्वर्गोपमं सर्जितपुण्यसंचयो गभीरगर्जद्रथतर्जिताम्बुदः।' धा. का. 1.30.

B. 'अतर्दकास्त्वथ विकर्दमाशयाः प्रखर्दवृत्तैरसमन्तितान्तिकाः।' धा. का. 1.9.

C. 'दुर्दान्तचक्र पशुपचुकनमप्यरौत्सीत् प्रक्षालितक्षितितलातुलवर्षरोधी।' धा.का.3.21.